# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 7 | गुणाः – ५० |
| विषयः – फलितज्योतिषम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – २०/०७/२०२१ | सन्दर्भग्रन्थः – भावकुतूहलम् | |

**सूचना -** **निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १** **अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ भार्गवे जनुरङ्गस्थे चाष्टमे सिंहिकासुतः।
मस्तके वामकर्णे वा चिह्नदर्शनमादिशेत्॥

२ लाभारिसहजे भौमे व्यये वा शुक्रसंयुते।
वामपार्श्वे गते चिह्नं विज्ञेयं व्रणजं बुधैः॥

३ आदित्याद्दशमे पापः पीडितो दशमाधिपः।
तदा पितुर्महाकष्टं निधनं वेति कीर्तितम्॥

**प्रश्नः २** **ग्रहाणां मित्रामित्रविचारः क्रियताम्।**

**प्रश्नः ३** **सन्तानभावविचारः क्रियताम्।**

**प्रश्नः ४** **कयोरपि द्वयोः पद्ययोः व्याख्या कार्या।**

१ न धने न व्यये खेटाश्चन्द्रादिह भवन्ति चेत्।
तदा केमद्रुमं प्राहुः पण्डिता मिहिरादयः॥

२ भद्रायां व्यतिपाते वा तथा केतूदये जनिः।
यस्य तस्य विनश्यन्ति राजयोगफलान्यपि॥

३ जनने प्रबलो यस्य राजयोगो भवेद्यदि।
करे वा चरणेऽश्यं राजचिह्नं प्रजायते॥

**प्रश्नः ५** **जीवनाथमते राजयोगविचारः क्रियताम्।**

**प्रश्नः ६** **जीवनाथमते दरिद्रयोगविचारः क्रियताम्।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः व्याख्या कार्या ।**

१ धनेशः शुक्रसंयुक्तोऽथवा शुक्रात्त्रिक भवेत् ।
सम्बन्धी लग्ननाथेन नेत्रयोः पीडनं भवेत् ॥

२ सहजे सहजाधीशे षडादित्रयगेऽपि वा ।
सहजेऽपि विशेषेण भ्रातुः सौख्यं न जायते ॥

३ धर्मगेहगते भौमे लग्नगे रविनन्दने ।
पञ्चमे दिवसाधीशे सा विषाख्या कुमारिका ॥

**प्रश्नः ८ सूर्यदशाफलं विलिख्यताम् ।**

**प्रश्नः ९ चन्द्रदशाफलं विलिख्यताम् ।**

**प्रश्नः १० दशानां प्रश्नानामुत्तरं लिखत ।**

१ केन्द्रभावानां नामानि लिखत ।
२ त्रिकोणभावानां नामानि लिखत ।
३ तुलाराशेः स्वामी कः ?
४ त्रिकभावानां नामानि लिखत ।
५ भौमस्य उच्चराशिः कः ?
६ मकरराशेः स्वामी कः ?
७ पुत्रस्य विचारः कस्मात् भावात् भवति ?
८ मातुः विचारः कस्मात् भावात् भवति ?
९ धनस्य विचारः कस्मात् भावात् भवति ?
१० सूर्यस्य स्वराशिः कः अस्ति ?
११ चन्द्रस्य स्वराशिः कः अस्ति ?
१२ भौमस्य स्वराशिः कः अस्ति ?
१३ 'भावकुतूहलम्' इत्यस्य रचनाकारः कः अस्ति ?
१४ हस्ते बुधपर्वतः कुत्र भवति ?
१५ अङ्गुलीनां नामानि लिखत ।

****